# || श्रीदक्षिणामूर्ति मूलमन्त्रात्मक अष्टोत्तरशतनाम स्तोत्रम् ||

www.kamakotimandali.com

श्रीदेव्युवाच
भगवन् देवदेवेश मन्त्रार्णस्तवमुत्तमम् |
दक्षिणामूर्तिदेवस्य कृपया वद मे प्रभो ||

श्रीमहादेव उवाच
साधु पृष्टं महादेवि सर्वलोकहिताय ते |
वक्ष्यामि परमं गुह्यं मन्त्रार्णस्तवमुत्तमम् ||
ऋषिश्छन्दो देवताङ्गन्यासादिकमनुत्तमम् |
मूलमन्त्रवदस्यापि द्रष्टव्यं सकलं हि तत् ||

ध्यानम्
भस्मव्यापाण्डुराङ्गः शशिशकलधरो ज्ञानमुद्राक्षमाला-
वीणापुस्तैर्विराजत्करकमलधरो योगपट्टाभिरामः |
व्याख्यापीठे निषण्णे मुनिवरनिकरैः सेव्यमानः प्रसन्नः
स्व्याळः कृत्तिवासाः सततमवतु नो दक्षिणामूर्तिरीशः ||

इति ध्यात्वा महादेवं मन्त्रार्णस्तवमुत्तमम् |
जपेत् त्रिसन्ध्यं नियतो भस्मरुद्राक्षभूषितह ||

ओङ्काराचलसिंहेन्द्रः ओङ्कारध्यानकोकिलः |
ओङ्कारनीडशुकराड् ओङ्कारार्णवकुञ्जरः ||
नगराजसुताजानिर्नगराजनिजालयः |
नवमाणिक्यमालाढ्यो नवचन्द्रशिखामणिः ||
नन्दिताशेषमौनीन्द्रो नन्दीशादिमदेशिकः |
महानलसुधासारो मोहाम्बुजसुधाकरः ||
मोहान्धकारतरणिर्मोहोत्पलनभोमणिः |

भक्तज्ञानाब्धिशीतांशुः भक्ताज्ञानतृणानलः ||
भक्ताम्भोजसहस्रांशुः भक्तकेकिघनाघनः |
भक्तकैरवराकेन्दुः भक्तकोकदिवाकरः ||
गजाननादिसंपूज्यो गजचर्मोज्ज्वलाकृतिः |
गङ्गाधवलदिव्याङ्गो गङ्गाभङ्गलसज्जटः ||
गगनाम्बरसंवीतो गगनामुक्तमूर्धजः |
वदनाब्जजिताब्जश्रीः वदनेन्दुस्फुरद्दिशः ||
वरदानैकनिपुणो वरवीणोज्ज्वलत्करः |
वनवाससमुल्लासो वनवीरैकलोलुपः ||
तेजःपुञ्जघनाकारो तेजसामपि भासकः |
तेजःप्रदो विनेयानां तेजोमयजनाश्रयः ||
दमितानङ्गसङ्ग्रामो दरहासजिताङ्गनः |
दयारससुधासिन्धुः दरिद्रधनशेवधिः ||
क्षीरेन्दुस्फटिकाकारः क्षीणेन्दुमकुटोज्ज्वलः |
क्षीरोपहाररसिकः क्षिप्रैश्वर्यफलप्रदः ||
नानाभरणमुग्धाङ्गो नारीसम्मोहनाकृतिः |
नादब्रह्मरसास्वादी नागभूषणभूषितः ||
मूर्तिनिन्दितकन्दर्पो मूर्तामूर्तजगद्वपुः |
मूकाज्ञानतमोभानुः मूर्तिमत्कल्पपादपः ||
तरुणादित्यसङ्काशः तन्त्रीवादनतत्परः |
तरुमूलैकनिलयः तप्तजाम्बूनदप्रभः ||
तत्त्वपुस्तोल्लसत्पाणिः तपनोडुपलोचनः |
यमसन्नुतसत्कीर्तिः यमसंयमसंयुतः ||
यतिरूपधरो मौनी यतीन्द्रोपास्यविग्रहः |
मन्दारहाररुचिरो मदनायुतसुन्दरः ||
मन्दस्मितलसद्वक्त्रो मधुराधरपल्लवः |
मञ्जीरमञ्जुपादाब्जो मणिपट्टोलसत्कटिः ||
हस्ताङ्कुरितचिन्मुद्रो हठयोगपरोत्तमः |
हंसजप्याक्षमालाढ्यो हंसेन्द्राराध्यपादुकः ||
मेरुशृङ्गतटोल्लासो मेघश्याममनोहरः |

मेधाङ्कुरालवालाग्र्यो मेधपक्वफलद्रुमः ||
धार्मिकान्तर्गुहावासो धर्ममार्गप्रवर्तकः |
धामत्रयनिजारामो धर्मोत्तममनोरथः ||
प्रबोधोदारदीपश्रीः प्रकाशितजगत्त्रयः |
प्रज्ञाचन्द्रशिलादर्शः प्रज्ञामणिवराकरः ||
ज्ञान्तरान्तरभासात्मा ज्ञातृज्ञातिविदूरगः |
ज्ञानाद्वैतसुदिव्याङ्गो ज्ञातृज्ञातिकुलागतः ||
प्रसन्नपारिजाताग्र्यः प्रणतार्त्यब्धिबाडवः |
प्रमाणभूतो भूतानां प्रपञ्चहितकारकः ||
यत्तत्वमसिसंवेद्यो यक्षगेयात्मवैभवः |
यज्ञादिदेवतामूर्तिः यजमानवपुर्धरः ||
छत्राधिपतिविश्वेशः छत्रचामरसेवितः |
छान्दश्शास्त्रादिनिपुणश्छलजात्यादिदूरगः ||
स्वाभाविकसुखैकात्मा स्वानुभूतरसोदधिः |
स्वाराज्यसंपदध्यक्षः स्वात्मारामममहामतिः ||
हाटकाभजटाजूटो हासोदस्तारमण्डलः |
हालाहलोज्ज्वलगळो हारायुतमनोहरः ||

|| इति शिवम् ||

## || śrīdakṣiṇāmūrti mūlamantrātmaka aṣṭottaraśatanāma stotram ||

śrīdevyuvāca
bhagavan devadeveśa mantrārṇastavamuttamam |
dakṣiṇāmūrtidevasya kṛpayā vada me prabho ||

śrīmahādeva uvāca
sādhu pṛṣṭaṃ mahādevi sarvalokahitāya te |
vakṣyāmi paramaṃ guhyaṃ mantrārṇastavamuttamam ||
ṛṣiśchando devatāṅganyāsādikamanuttamam |

mūlamantravadasyāpi draṣṭavyaṃ sakalaṃ hi tat ||

dhyānam
bhasmavyāpāṇḍurāṅgaḥ śaśiśakaladharo jñānamudrākṣamālā-
vīṇāpustairvirājatkarakamaladharo yogapaṭṭābhirāmaḥ |
vyākhyāpīṭhe niṣaṇṇe munivaranikaraiḥ sevyamānaḥ
prasannaḥ
svyāḻaḥ kṛttivāsāḥ satatamavatu no dakṣiṇāmūrtirīśaḥ ||

iti dhyātvā mahādevaṃ mantrārṇastavamuttamam |
japet trisandhyaṃ niyato bhasmarudrākṣabhūṣitaha ||

oṅkārācalasiṃhendraḥ oṅkāradhyānakokilaḥ |
oṅkāranīḍaśukarāḍ oṅkārārṇavakuñjaraḥ ||
nagarājasutājānirnagarājanijālayaḥ |
navamāṇikyamālāḍhyo navacandraśikhāmaṇiḥ ||
nanditāśeṣamaunīndro nandīśādimadeśikaḥ |
mahānalasudhāsāro mohāmbujasudhākaraḥ ||
mohāndhakāratarаṇirmohotpalanabhomaṇiḥ |
bhaktajñānābdhiśītāṃśuḥ bhaktājñānatṛṇānalaḥ ||
bhaktāmbhojasahasrāṃśuḥ bhaktakekighanāghanaḥ |
bhaktakairavarākenduḥ bhaktakokadivākaraḥ ||
gajānanādisaṃpūjyo gajacarmojjvalākṛtiḥ |
gaṅgādhavaladivyāṅgo gaṅgābhaṅgalasajjaṭaḥ ||
gaganāmbarasaṃvīto gaganāmuktamūrdhajaḥ |
vadanābjajitābjaśrīḥ vadanendusphuraddiśaḥ ||
varadānaikanipuṇo varavīṇojjvalatkaraḥ |
vanavāsasamullāso vanavīraikalolupaḥ ||
tejaḥpuñjaghanākāro tejasāmapi bhāsakaḥ |
tejaḥprado vineyānāṃ tejomayajanāśrayaḥ ||
damitānaṅgasaṅgrāmo darahāsajitāṅganaḥ |
dayārasasudhāsindhuḥ daridradhanaśevadhiḥ ||
kṣīrendusphaṭikākāraḥ kṣīṇendumakuṭojjvalaḥ |
kṣīropahārarasikaḥ kṣipraiśvaryaphalapradaḥ ||
nānābharaṇamugdhāṅgo nārīsammohanākṛtiḥ |
nādabrahmarasāsvādī nāgabhūṣaṇabhūṣitaḥ ||
mūrtininditakandarpo mūrtāmūrtajagadvapuḥ |
mūkājñānatamobhānuḥ mūrtimatkalpapādapaḥ ||

taruṇādityasaṅkāśaḥ tantrīvādanatatparaḥ |
tarumūlaikanilayaḥ taptajāmbūnadaprabhaḥ ||
tattvapustollasatpāṇiḥ tapanoḍupalocanaḥ |
yamasannutasatkīrtiḥ yamasaṃyamasaṃyutaḥ ||
yatirūpadharo maunī yatīndropāsyavigrahaḥ |
mandārahāraruciro madanāyutasundaraḥ ||
mandasmitalasadvaktro madhurādharapallavaḥ |
mañjīramañjupādābjo maṇipaṭṭolasatkaṭiḥ ||
hastāṅkuritacinmudro haṭhayogaparottamaḥ |
haṃsajapyākṣamālāḍhyo haṃsendrārādhyapādukaḥ ||
meruśṛṅgataṭollāso meghaśyāmamanoharaḥ |
medhāṅkurālavālāgryo medhapakvaphaladrumaḥ ||
dhārmikāntarguhāvāso dharmamārgapravartakaḥ |
dhāmatrayanijārāmo dharmottamamanorathaḥ ||
prabodhodāradīpaśrīḥ prakāśitajagatrayaḥ |
prajñācandraśilādarśaḥ prajñāmaṇivarākaraḥ ||
jñāntarāntarabhāsātmā jñātṛjñātividūragaḥ |
jñānādvaitasudivyāṅgo jñātṛjñātikulāgataḥ ||
prasannapārijātāgryaḥ praṇatārtyabdhibāḍavaḥ |
pramāṇabhūto bhūtānāṃ prapañcahitakārakaḥ ||
yattatvamasisaṃvedyo yakṣageyātmavaibhavaḥ |
yajñādidevatāmūrtiḥ yajamānavapurdharaḥ ||
chatrādhipativiśveśaḥ chatracāmarasevitaḥ |
chāndaśśāstrādinipuṇaśchalajātyādidūragaḥ ||
svābhāvikasukhaikātmā svānubhūtarasodadhiḥ |
svārājyasampadadhyakṣaḥ svātmārāmamahāmatiḥ ||
hāṭakābhajaṭājūṭo hāsodastāramaṇḍalaḥ |
hālāhalojjvalagalo hārāyutamanoharaḥ ||

|| iti śivam ||

www.kamakotimandali.com